दिनाङ्क : 25/11/2025 सायम् - 06:20

## मुख्यवार्ता:

- प्रधानमंत्री नरेन्द्र मोदी हरियाणाया: कुरुक्षेत्रे गुरु-तेग-बहादुर-जी वर्यस्य पञ्चाशदुत्तर-त्रिशत-तम-बलिदान-दिवसस्य स्मरणे विशिष्ट-कार्यक्रमे भागं भजति।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उत्तरप्रदेशस्य अयोध्यायां स्थितस्य श्रीरामजन्मभूमि-मन्दिरस्य शिखरस्य उपरि धर्मध्वजारोहणं कृतम्, उक्तं च यत् अयं ध्वजः भारतीयसंस्कृतेः पुनर्जागरणं प्रदर्शयति।
- स्टेट-बैङ्क-ऑफ-इण्डिया इत्यस्य प्रतिवेदनस्य अनुसारं सप्त-सप्तति लक्षं यावत् अतिरिक्त-वृत्यावसराणां सृजनं भविष्यति।
- अफगानिस्तानस्य खोस्त-प्रान्तस्य आवासीयक्षेत्रे पाकिस्तानी-सैनिकानाम् आक्रमणे नव बालकैः सह दश नागरिकाः मृत्युमुपगताः।
- दक्षिण-अफ़्रिका-दलेन प्रदत्तस्य ऊनपञ्चाशदधिक-पञ्चशत धावनाङ्कानाम् अनुसरणे, गुवाहाटी-नगरस्य बरसापारा-क्रिकेट-क्रीडाङ्गणे द्वितीयान्तिमस्य क्रिकेट-निकष-क्रीडायाः चतुर्थे दिने, भारतं द्वितीय-पार्यां द्वाभ्यां स्तोभाभ्यां हानौ सप्तविंशति धावनांकानि समर्जितवान्।

## प्रधानमन्त्री - कुरुक्षेत्र::

प्रधानमंत्री नरेन्द्रमोदी हरियाणाया: कुरुक्षेत्रे गुरु-तेग-बहादुर-जी वर्यस्य पञ्चाशदुत्तर-त्रिशत-तम-बलिदान-दिवसस्य स्मरणे विशिष्ट-कार्यक्रमे भागं भजति। कार्यक्रमस्य अवसरे श्री मोदी पूज्यगुरु-तेग-बहादुर वर्यस्य बलिदानदिवसस्य स्मारक-रूपेण विशेष-मुद्रां प्रैष्यचिटिकां च विमोचितवान्। यात्रावधौ प्रधानमन्त्री भगवत: श्रीकृष्णस्य पवित्रशङ्खस्य सम्माने परिकल्पितस्य नवनिर्मितस्य भवनस्य पाञ्चजन्यस्य अपि उद्घाटनं कृतवान् । अस्मिन् अवसरे हरियाणा-राज्यस्य राज्यपालः प्रो. असीम कुमारघोषः, मुख्यमन्त्री नायबसिङ्घ् सैनी, हरियाणा-सिक्ख्-गुरुद्वारा-व्यवस्थापन-समितेः अध्यक्षः जगदीशसिङ्घ् झिण्डा च उपस्थिताः आसन्। गुरु-तेग-बहादुर वर्यस्य सार्द्ध-त्रिशत-तमे हुतात्म-दिवसस्य सम्माने केन्द्रसर्वकारः एकवर्षं यावत् कार्यक्रमम् आचरति।

## प्रधानमंत्री-उत्तरप्रदेशस्य

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य उत्तरप्रदेशस्य अयोध्यायां स्थितस्य श्रीरामजन्मभूमि-मन्दिरस्य शिखरस्य उपरि धर्मध्वजारोहणं कृतम्। अनेन मन्दिर-निर्माणकार्यस्य समाप्तेः, सांस्कृतिक-उत्सवस्य, राष्ट्रिय-एकतायाः च नूतनः अध्यायः प्रारब्धः। अस्मिन् अवसरे प्रधानमन्त्रिणा उक्तं यत् अयं ध्वजः भारतीयसंस्कृतेः पुनर्जागरणं प्रदर्शयति। सः अवदत् यत्, अयं पवित्रः ध्वजः साक्ष्यरूपेण स्थितः भविष्यति यत् अन्ततो-गत्वा सत्येन असत्यं पराजितम्। प्रधानमन्त्री अवदत् यत् लोकतन्त्रम् अस्य देशस्य कोशिकासु विद्यते।

सः अवदत् यत् केन्द्रसर्वकारः प्रत्येकस्य जनस्य कृते विशेषतः समाजस्य उपेक्षित-वर्गस्य उन्नत्यै कार्यं कुर्वन् अस्ति। सः अवदत्, रामः भेदभावं न करोति, सर्वकारः अपि अनेन एव भावेन अग्रे गच्छन् अस्ति। प्रधानमन्त्रिणा उक्तं यत् अयोध्यायां राममन्दिरस्य औपचारिकपूर्त्या सहैव पञ्चशतवर्षाणां प्राचीनः संकल्पोपि पूर्णः भवति ।

## नूतनश्रम-संहितानां

नूतनानां श्रम-संहितानां कार्यान्वयनेन अर्थव्यवस्थायां महती वृद्धिः भविष्यति, देशे निरुद्योगेषु अपि न्यूनतागमिष्यति । स्टेट्-बेङ्क्-आफ़्-इण्डिया (एस्. बी. आई.) इत्यस्य प्रतिवेदनस्य अनुसारं, अस्मिन् मासे एकविंशति दिनाङ्के प्रवृत्ताः नूतन-श्रम-संहिताः त्रीणि दशमलवोत्तर एक प्रतिशतं यावत् निरुद्योगं न्यूनीकर्तुं शक्नुवन्ति, येन सप्त-सप्तति लक्षं यावत् अतिरिक्त-वृत्यावसराणां सृजनं भविष्यति। एस्. बी. आई. इत्यनेन प्रतिवेदने उक्तं यत् अनेन श्रमशक्तौ औपचारि-करणस्य अंशः न्यूनातिन्यूनं पञ्चदश प्रतिशतं वर्धयिष्यति, येन कुल-औपचारिक-कर्मकराः वर्तमान-अनुमानित-अंशात् चत्वारि दशमलवोत्तर षष्ठिः प्रतिशतात् पञ्च दशमलवोत्तर पञ्चसप्ततिः प्रतिशतं यावत् भविष्यन्ति।

## अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवः

भारतस्य षट्पञ्चाशत्तमः अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवः, सुप्रसिद्ध-अभिनेत्रे धर्मेन्द्र वर्याय भारतीय-चलच्चित्रस्य कृते तस्य अपार-योगदानाय सम्मानं कुर्वन्, श्रद्धाञ्जलिम् समर्पितवान्। चलच्चित्रनिर्माता राहुल रवैलः तस्य योगदानं स्मरन्, सः एकः प्रतिष्ठितः अभिनेता, असाधारणः व्यक्तित्वः च उक्तवान्। कार्यं प्रति समर्पणम्, उत्साहः च वर्णितवान्। श्रीरवैलः मेरा नाम जोकर, बेताब् इत्यादीनां चलच्चित्राणां हृदयस्पर्शी स्मृतयः उक्तवान्।

## शिवराज्-सिङ्घ्-चौहानः

केन्द्रीय-ग्रामविकास-मन्त्री शिवराज्-सिङ्घ्-चौहानः अद्य नवदिल्ल्यां लैङ्गिक-समानतायाः महिला-शक्तीकरणस्य च विषये राष्ट्रव्यापी-अभियानस्य **'नई चेतना पहल बदलाव की'** इत्यस्य चतुर्थ-संस्करणम् उद्घाटितवान्। सभां संबोधयन् श्रीचौहानः, महिलानाम् आर्थिक-शक्तीकरणं महत्त्वपूर्णम् उक्तवान्। केन्द्रीयमहिला-बालविकासमन्त्री अन्नपूर्णा देवी अपि अस्मिन् कार्यक्रमे भागं भजितवती। सद्यः एव कार्यान्वितानां श्रम-संहितायाः परिष्काराणां विषये मन्त्रिणा उक्तं यत्, नूतनानि परिष्काराणि, महिलानां समान-कार्याय समानं देयं, सुरक्षित-कार्यस्थलानि, रात्रिकाले अपि सुरक्षित-वातावरणानि च प्रदातुं ऐतिहासिकं सोपानम् अस्ति इति।

## सञ्जय सेठः

रक्षा-राज्यमन्त्री सञ्जय सेठः अद्य अवदत् यत्, विगतेषु केषुचित् वर्षेषु राष्ट्रस्य पोतनिर्माणक्षेत्रं वर्धितम्। नवदिल्ल्यां समुद्रउत्कर्ष-संगोष्ठ्यां प्रवदन्, श्रीसेठः समुद्रउत्कर्षं भारतस्य पोतनिर्माणक्षमतायाः उत्सवस्य प्रदर्शनस्य च महत्त्वपूर्णः कार्यक्रमः इति उद्घोषितवान्। सः अग्रे अवदत् यत् समुद्र-उत्कर्षः भारतस्य समृद्ध-परम्पराः जनान् स्मारयति तथा च आधुनिक-अत्याधुनिक-प्रौद्योगिकीभिः सह तस्य क्षमतां प्रदर्शयति तथा च पोतनिर्माणस्य सुदृढां राष्ट्रिय-क्षमतां प्रदर्शयति। मन्त्रिणा उक्तं यत् समुद्र-उत्कर्षः नवीनतमानि आविष्कारानि प्रकाशयति।

## लोकसभा -ओमबिरला

लोकसभा-अध्यक्षः ओमबिरला वर्यः यूनः संविधान-निर्माणस्य प्रक्रियां, तस्य मूलसिद्धान्तान् गहनतया अवगन्तुं, तथा च भारतं विकसितराष्ट्रं निर्मातुं सक्रियरूपेण योगदानाय प्रार्थितवान्।

श्रीबिरला वर्यः अद्य जयपुरस्य एकस्मिन् निजीविश्वविद्यालये 'संविधानदिवसस्य' अवसरे आयोजिते कार्यक्रमे सम्बोधयन् आसीत्। सः अवदत् यत् सामूहिक-योगदानस्य भावना संविधाने अन्तर्निहितास्ति, सामूहिक-प्रयासानां विना विकसितराष्ट्रस्य निर्माणस्य स्वप्नस्य पूर्तिः न शक्यते। लोकसभाध्यक्षः अवदत् यत् लोकतान्त्रिकमूल्यानां मूलानि अस्माकं परम्परासु समाविष्टानि सन्ति।

## <u>अफगानिस्तान</u>

अफगानिस्तानस्य खोस्त-प्रान्तस्य आवासीयक्षेत्रे पाकिस्तानी-सैनिकानाम् आक्रमणे नव बालकैः सह दश नागरिकाः मृत्युमुपगताः। अफ़गानिस्तान-सर्वकारस्य प्रवक्ता अवदत् यत्, आक्रमणं प्रायः मध्यरात्रौ अभवत्, स्थानीयनिवासिनः गृहे आक्रमणानन्तरं सीमायां शत्रुता संवर्धनस्य आशङ्का पुनः वर्धिता। पूर्वं, अस्मिन् वर्षे अक्टूबर-मासे, पाकिस्तान-देशः काबुल, खोस्त, जलालाबाद, पक्तिका इत्येतेषु नगरेषु वायवीयाक्रमणं प्रारब्धवान्, येन अफ़गान्-तालिबान्-दलस्य प्रतिकार-कार्याचरणम् आरब्धम्।

## <u>क्रिकेट</u>

दक्षिण-अफ़्रिका-दलेन प्रदत्तस्य ऊनपञ्चाशदधिक पञ्चशत धावनाङ्कानाम् अनुसरणे, गुवाहाटी-नगरस्य बरसापारा-क्रिकेट-क्रीडाङ्गणे द्वितीयान्तिमस्य क्रिकेट-निकष-क्रीडायाः चतुर्थे दिने, भारतं द्वितीय-पार्यां द्वाभ्यां स्तोभाभ्यां हानौ सप्तविंशति धावनांकानि समर्जितवान्।

।। इति वार्ताः ।।